योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०९३

त्रिनवतितमः सर्गः ९३

श्रीवसिष्ठ उवाच ।

अथैवंरूपसंवित्तेः परावृत्त्य प्रयत्नतः ।

तमम्बरकुटीकोशदेशमागतवानहम् ।। १

यावत्तत्र न पश्यामि स्वदेहं क्वचन स्थितम् ।

पश्यामि केवलं सिद्धं कमप्यन्यं पुरः स्थितम् ।। २

उपविष्ट समाधाननिष्ठमिष्टं पदं गतम् ।

सौम्योदयमिवादित्यं दग्धेन्धनमिवानलम् ।। ३

बद्धपद्मासनं शान्तं समाधाननिरिङ्गनम् ।

गुल्फद्वितयमध्यस्थवृषणं विषयातिगम् ।। ४

मृष्टसौम्यसमाभोगस्कन्धबन्धुरकन्धरम् ।

सुस्थिरोदारविश्रान्तरकारकस्थितिसुन्दरम् ।। ५

नाभीनिकटगोत्तानपाणिद्वितयदीप्तिभिः ।

हृदयाम्भोजतेजोभिर्बहिष्ठैरिव भासितम् ।। ६

श्लिष्टपक्ष्मेक्षणं क्षीणसर्वेक्षं स्वच्छतां गतम् ।

सरो निमीलिताम्भोजमिव सुप्तं दिनात्यये ।। ७

अविक्षुभितमाशान्तमन्तःकरणकोटरम् ।

दधानं धीरया वृत्त्या शान्तोत्पातमिवाम्बरम् ।। ८

अपश्यता निजं देहं तं मुनिं पश्यता पुरः ।

इदं मया तदा तत्र चिन्तितं चारुचेतसा ।। ९

अयं कश्चिन्महासिद्धः संप्राप्तोऽस्मिन्दिगन्तरे ।

विचार्याहमिवैकान्तं विश्रामार्थी महाम्बरम् ।। १०

समाधियोग्यमेकान्तं लभेयेतीह चिन्तया ।

कुटी दृष्टेयमेतेन सत्यसंकल्पशालिना ।। ११

मदागमनमेतेन ततोऽचिन्तयता चिरम् ।

तं स्वदेहं शवीभूतमपास्येह कृता स्थितिः ।। १२

तदिहास्तमहं यामि स्वं लोकमिति निश्चयम् ।

यावद्गन्तुं प्रवृत्तोऽस्मि तावत्संकल्पनक्षयात् ।। १३

सा निवृत्ता कुटी तत्र संपन्नं व्योम केवलम् ।

स सिद्धोऽपि निराधारः पतितोधः समाधिमान् १४

स्वप्नसंकल्पसंशान्तौ स्वप्नसंकल्पपत्तनम् ।

यदा सा सुकुटी नष्टा मत्संकल्पोपशान्तितः ।। १५

स पपात ततो ध्यानी जलोत्पीड इवाम्बुदात् ।

खादिवानिलनुन्नोऽब्द इन्दुबिम्बमिव क्षये ।। १६

वैमानिक इवापुण्यश्छिन्नमूल इव द्रुमः ।

खात्त्यक्त इव पाषाणः स पपात ततोऽवनौ ।। १७

अहं यावदियं तावत्कुटिकास्त्विति कल्पने ।

क्षीणे कुटीक्षये जाते स सिद्धः पतितः क्षणात् ।।१८

पतता तेन सिद्धेन ततः सौजन्यकौतुकः ।

मनसैवाहमगमं नभसो वसुधातलम् ।। १९

सोऽपतत्पवनस्कन्धवलनावर्तवृत्तिभिः ।

सप्तद्वीपसमुद्रान्ते गीर्वाणरमणावनौ ।। २०

प्राणापानोर्ध्वगामित्वात्खाद्यथास्थितमेव सः ।

सृष्टपूर्वोर्ध्वमूर्धोर्व्यां बद्धपद्मासनोऽपतत् ।। २१

न प्रबुद्धो बभूवासौ विचरं तमचेतनः ।

पाषाणदेह इव वा तूलात्मेवैव वा लघुः ।। २२

मया तदवबोधार्थमथ यत्नवता तदा ।

कृत्वा जलदतां व्योम्नि वृष्टं गर्जितमूर्जितम् ।। २३

करकाशनिपातेन तेन तस्मिन्दिगन्तरे ।

मयूरं प्रावृषेवामुं बुद्ध्या बोधितवानसौ ।। २४

बभूवाभासिताङ्गश्रीर्विकासितविलोचनः ।

धारानिकरफुल्लात्मा प्रावृषीवाम्बुजाकरः ।। २५

प्रबुद्धं संप्रशान्तायां दृष्टौ तमहमग्रतः ।

अपृच्छं स्वच्छया वृत्त्या निवृत्तं परमार्थतः ।। २६

क्व स्थितोऽसि करोषीदं किं च भो मुनिनायक ।

कस्त्वं कस्मादलं दूरान्न भ्रंशमपि चेतसि ।। २७

इत्युक्तो मामसौ प्रेक्ष्य संस्मृत्य प्राक्तनीं गतिम् ।

उवाच वचनं चारु चातको जलदं यथा ।। २८

सिद्ध उवाच ।

प्रतिपालय मे यावत्स्ववृत्तान्तं स्मराम्यहम् ।

कथयिष्यामि ते पश्चात्पाश्चात्यं वृत्तमात्मनः ।। २९

इत्युक्त्वा चिन्तयित्वाशु स यथा वृत्तमक्षतम् ।

स्मृतवान्सायमह्नीव समाचरितमात्मनः ।। ३०

मामथोवाच वचनं चारु चन्द्रांशुशीतलम् ।

आह्लादनमनिन्द्यं च निरवद्यं सुखोदयम् ।। ३१

सिद्ध उवाच ।

अधुना त्वं मया ब्रह्मन्परिज्ञातोऽभिवादये ।

अतिक्रमोऽयं क्षन्तव्यः स्वभावो हि सतां क्षमा ।।३२

मुने चिरमहं भ्रान्तो देवोपवनभूमिषु ।

भोगामोदविमोहेषु षट्पदः पद्मिनीष्विव ।। ३३

दृश्यनद्यामथो चित्तजलकल्लोलहेलया ।

चक्रावर्तोह्यमानेन मयोद्विग्नेन चिन्तितम् ।। ३४

संसारसागरे दृश्यकल्लोलैरहमाकुलः ।

कालेनोद्वेगमायातश्चातकोऽवग्रहे यथा ।। ३५

संविन्मात्रैकसारेषु रम्यं भोगेषु नाम किम् ।

अवतिष्ठे गतोद्वेगसंविद्व्योम्न्येव केवलम् ।। ३६

शब्दरूपरसस्पर्शगन्धमात्रादृते परम् ।

नेह किंचन नामास्ति किमेतावत्यहं रमे ।। ३७

चिन्मात्राकाशमेवैतत्सर्वं चिन्मात्रमेव वा ।

तत्किमत्रासदाकारे रमे नष्टमतिर्यथा ।। ३८

विषया विषवैषम्या वामाः कामविमोहदाः ।

रसाः सरसवैरस्या लुठन्नेषु न को हतः ।। ३९

जीर्णा जीवितजम्बालजरच्छफरिकामतिः ।

कायं द्रुतगताऽऽदातुं जरेच्छति बृहद्बकी ।। ४०

कायोऽयमचिरापायो बुद्बुदोऽम्बुनिधाविव ।

स्फुरन्नेव पुरोन्तर्द्धिं याति दीपशिखा यथा ।। ४१

विविधाकुलकल्लोला चक्रावर्तविधायिनी ।

मृतिजन्मवृहत्कूला सुखदुःखतरङ्गिणी ।। ४२

यौवनोल्लासकलिला जराधवलफेनिला ।

काकतालीययोगेन संपन्नसुखबुद्बुदा ।। ४३

व्यवहारमहावाहलेखाजडरवाकुला ।

रागद्वेषघनोल्लासा भूतलालोलदेहिका ।। ४४

लोभमोहमहावर्ता पातोत्पातविवर्तनी ।

हा तप्ता जीविताख्येयं नदी नदनशीतला ।। ४५

अपूर्वाण्युपगच्छन्ति तथा पूर्वाणि यान्त्यलम् ।

संसारसरिदम्बूनि संगतानि धनानि च ।। ४६

प्रवृत्ता ये निवर्तन्ते तैरलं हतभावकैः ।

अपूर्वा ये प्रवर्तन्ते तेष्वथास्थेह कीदृशी ।। ४७
सर्वस्याः सरितो वारि प्रयात्यायाति चाकरात् ।
देहनद्याः पयस्त्वायुर्यात्येवायाति नो पुनः ।। ४८
शतशः परिवर्तन्ते प्रतिपिण्डं क्षणं प्रति ।
कुलालचक्रकाभावा इव भावा भवाम्बुधौ ।। ४९
चरन्ति चतुराश्चौरा विषमा विषयारयः ।
हरन्ति भावसर्वस्वं जागर्मि स्वपिमीह किम् ।। ५०
आयुषः खण्डखण्डाश्च निपतन्तः पुनःपुनः ।
न कश्चिद्वेत्ति कालेन क्षतानि दिवसान्यहो ।। ५१
इदमद्य तथेदं च तथेदमिदमस्य मे ।
एवं कलनया लोको गतं प्राप्तं न वेत्त्यहो ।। ५२
भुक्तं पीतमनन्तासु भ्रान्तं च वनभूमिषु ।
दृष्टानि सुखदुःखानि किमन्यदिह साध्यते ।। ५३
सुखदुःखानुभवनाद्भूयोभूयो विवर्तनात् ।
अनित्यत्वाच्च भावानां स्थिता निष्कौतुका वयम् ।। ५४
भुक्तानि भोगवृन्दानि दृष्टा चानित्यता भृशम् ।
नोपलभ्यत एवाति विश्रान्तिरिह कुत्रचित् ।। ५५
भ्रान्तमुत्तुङ्गशृङ्गासु मेरूपवनभूमिषु ।
लोकपालपुरीषूच्चैः संप्राप्तं किमकृत्रिमम् ।। ५६
सर्वत्र दारुभिर्वृक्षा मांसैर्भूतानि भूर्मृदा ।
दुःखान्यनित्यता चेति कथमाश्वास्यते वद ।। ५७
न धनानि न मित्राणि न सुखानि न बान्धवाः ।
शक्नुवन्ति परित्रातुं कालेनाकलितं जनम् ।। ५८
जनो जीमूतजठरजलवद्गिरिकुक्षिषु ।
यात्यन्तःशून्य एवास्तं पांसूपचयपेलवः ।। ५९
न मे मनोरमाः कामा न च रम्या विभूतयः ।

इदं मत्ताङ्गनापाङ्गभङ्गलोलं च जीवितम् ।। ६०

क्वेव कस्य कथं नाम कुत आश्वासना मुने ।

अद्य श्वो वाऽऽपदं पापो मृत्युर्मूर्ध्नि नियच्छति ।।६१

शरीरं पर्णवद्भ्रंशि जीवितं जीर्णसंस्थिति ।

धीरधीरतया ग्रस्ता रसा नीरसतां गताः ।। ६

नीतं मनोरथैरेव नीरसैर्वाऽऽयुराततम् ।

न मम स्वं चमत्कारकारि किंचिदपीहितम् ।। ६३

मोहोऽद्य मान्यमायातो देहो नेहोपयुज्यते ।

अनास्थैवोत्तमावस्था स्थानास्थैवाधमा स्थितिः ।। ६४

आपदापतितैवेयमहो मोहविधायिनी ।

नित्यमित्येव मन्तव्यं सक्तव्यं नेह संसृतौ ।। ६५

विधिभिः प्रतिषेधैश्च शाश्वतैरप्यशाश्वतैः ।

यथेष्टं नीयते लोको जलं निमनोन्नतैरिव ।। ६६

विवेकामोदसर्वस्वं चेतः कुसुमकोशतः ।

हृत्वा मूर्च्छां प्रयच्छन्ति विषया विषवायवः ।। ६७

असदेव तथा नाम दृष्टं सत्तामुपागतम् ।

यथाऽसदेव सद्रूपं संपन्नमसदेव सत् ।। ६८

दोलायन्त्योऽवनौ देहं सागरान्सागराङ्गनाः ।

यथा धावन्ति धावन्ति जनता विषयांस्तथा ।। ६९

धावन्ति विषयाँल्लक्ष्यमुन्मुक्ताश्चित्तसायकाः ।

स्पृशन्ति न गुणान्भूयः कृतघ्नाः सौहृदं यथा ।। ७०

उत्पातवायुरेवायुर्मित्राण्येवातिशत्रवः ।

बन्धवो बन्धनान्येव धनान्येवाति नैधनम् ।। ७१

सुखान्येवातिदुःखानि संपदः परमापदः ।

भोगा भवमहारोगा रतिरेव परारतिः ।। ७२

आपदः संपदः सर्वाः सुखं दुःखाय केवलम् ।

जीवितं मरणायैव बत मायाविजृम्भितम् ।। ७३

बहून्कालपरावर्तानिष्टानिष्टान्सुखं मनाक् ।

पश्यन्प्रियवियोगांश्च याति जर्जरतां जनः ।। ७४

भोगा विषयसंभोगा भोगा एव फणावताम् ।

दशन्त्येव मनाक् स्पृष्टा दृष्टा नष्टाः प्रतिक्षणम् ।। ७५

आयुर्याति निरायासपदप्राप्तिविवर्जितैः ।

उदर्कभङ्गुराकारैः करालैः कष्टचेष्टितैः ।। ७६

भोगाशाबद्धतृष्णानामपमानः पदे पदे ।

आलानमवलीनानां वन्यानामिव दन्तिनाम् ।। ७७

संपदः प्रमदाश्चैव तरङ्गोत्सङ्गभङ्गुराः ।

कस्तास्वहिफणाच्छत्रच्छायासु रमते बुधः ।। ७८

सत्यं मनोरमाः कामाः सत्यं रम्या विभूतयः ।

किंतु मत्ताङ्गनापाङ्गभङ्गलोलं हि जीवितम् ।। ७९

आपातरमणीयेषु रमन्ते विषयेषु ये ।

अत्यन्तविरसान्तेषु पतन्ति निरयेषु ते ।। ८०

द्वन्द्वदोषोपरुद्धानि दुःसाध्यान्यस्थिराणि च ।

धनान्यभव्यसेव्यानि मम जातु न तुष्टये ।। ८१

आपातमात्रमधुरा दुःखपर्यवसायिनी ।

मोहनायैव लोकस्य लक्ष्मीः क्षणविलासिनी ।। ८२

आपातरमणीयानि विमर्दविसराण्यति ।

दुःखान्यापत्प्रदातृणि संगतानि खलैरिव ।। ८३

शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः ।

आपातरम्या विषयाः पर्यन्तपरितापिनः ।। ८४

अन्तकः पर्यवस्थाता जीविते महतामपि ।

चलन्त्यायूंषि शाखाग्रलम्बाम्बूनीव देहिनाम् ।। ८५

जीर्यन्ते जीर्यतः केशा हुत्वा जीर्यन्ति जीर्यतः ।

क्षीयते जीर्यते सर्वं तृष्णैवैका न जीर्यते ।। ८६

भोगाभोगातिगहने सर्वस्मिन्कायकानने ।

परमुल्लासमायाति तृष्णैका विषमञ्जरी ।। ८७

बाल्यं यौवनवद्याति यौवनं याति बाल्यवत् ।

उपमानोपमेयत्वं भङ्गुरत्वं मिथोऽनयोः ।। ८८

जीवितं गलति क्षिप्रं जलमञ्जलिना यथा ।

प्रवाह इव वाहिन्या गतं न विनिवर्तते ।। ८९

झटित्येवागतो देहः कुतोऽप्यर्जुनवातवत् ।

याति पश्यत एवास्तं तरङ्गाम्बुददीपवत् ।। ९०

रम्येष्वरम्यता दृष्टा स्थिरेष्वस्थिरतापि च ।

सत्येष्वसत्यतार्थेषु तेनेह विरसा वयम् ।। ९१

सुखं यदात्मविश्रान्तौ गते मनसि सत्त्वताम् ।

पाताले भूतले स्वर्गे तन्न भोगेषु केषुचित् ।। ९२

अपि संपूर्णहृद्यार्थाः पञ्चापीन्द्रियवृत्तयः ।

तावज्जयन्ति मामेता भृङ्गं चित्रलता इव ।। ९३

अद्य दीर्घेण कालेन निरहंकृतिना मया ।

स्वर्गापवर्गवैतृष्ण्यमिदमासादितं धिया ।। ९४

चिरमेकान्तविश्रान्त्यै तेनैतन्नभसः पदम् ।

त्वमिवागतवानत्र दृष्टवानस्मि तां कुटीम् ।। ९५

अद्यैतत्संपरिज्ञातं यदेषा भवतः कुटी ।

आगन्ता त्वं पुनश्चेति मया तन्न विचारितम् ।। ९६

तदा त्वत्र मया ज्ञातं कश्चित्सिद्धोऽयमात्मना ।

देहं त्यक्त्वेह निर्वाणं गत इत्यनुमानतः ।। ९७

एतन्मे भगवन्वृत्तमेषोऽस्मीति यथास्थितम् ।

मया ते कथितं सर्वं यथा जानासि तत्कुरु ।। ९८

सिद्धैर्न यावदवधानपरैर्विचार्य
निर्णीतमुत्तमधियान्तरशेषवस्तु ।
तावत्त्रिकालकलनं न विदन्ति किंचि-
दित्यब्जजादिमनसोऽपि मुने स्वभावः ।।९९

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० पा० आकाशमण्डपसिद्धसमागमगाथावर्णनं नाम त्रिनवतितमः सर्गः ।।९३ ।।